ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः, हरिः ओं

# स्वस्ति वाचनम्

## (Compiled by Vedha SIRAS, Chennai)

# Introduction to Svasti VAchanam

The word "Svasti" means "auspiciousness" *(blessing, fortune, prosperity, welfare)* and the word "VAchanam" means "sayings" (*vaarthai in Tamil*). Hence, Svasti VAchanam means "Auspicious sayings" ("*Mangala VArthai*" in tamil).

In all the four Veda Sakhais (*Rik, Yajur, SAma* , and *Atharvana*) there are collection of manthras that are considered to be very auspicious and are named as "Svasti VAchanam" , used for the well-being of the Universe / Loka Kshemam.

"Svasti VAchanam" in Krishna Yajur Vedam, TaittirIya SamhitA, consists of 67 manthras (four Anuvakams) in the fourth KAndam ***(4-6-4; 4-6-6; 4-7-14, and 4-7-15)*** are considered as a very powerful manthra KOsam and is being chanted in several auspicious functions / occasions, such as:

1. Before commencing any auspicious vaideeka ritual and good functions (*Sath karyams*);
2. In all temple festivals, specifically while the Utsava Moorthy is being brought outside the premises during occasions like "Ankuraarpanam", "Veedhi Purappadu", Car festival (*Thiru ThEr purappadu*), TheerthaVaari, etc,;
3. During Acharya Vijaya Yathras;
4. Before commencing any Yagna as a part of Agni Sayanam;
5. During Grahapravesam, while (Owners) entering the house;
6. While Vaideekas are returning from the river, tanks, Ponds, after performing "KAnda Rishi Tharpanam" as a part of Avani Avittam yearly ritual.

The first Anuvakam in Svasti VAchanam which starts as "Aasus Sisaano" (4-6-4) is called as "Aprathi Ratham" which means by reciting these manthras one can conquer even the undefeatable enemies.
The Bhatta Baskara vyakhyanam *(for the Brahmana portion relevant to these Samhithai manthras)* states that only after chanting these manthras, the heavenly gods (Devas) could win the war against Demons (Asuras) and

defeated them and thus the name “Aprathi ratham” came for these collection of 15 manthras.
Chanting this Aprathi ratham is a must before commencing some yagnas like Soma Yaga, Sathra Yaga etc.,

The second Anuvakam in Svasti VAchanam starts as “Jeemuthasyeva” (4-6-6) consists of 20 manthras is being chanted in several stages while performing Asvamedha Yagna.

The third Anuvakam starts as “MamaagnE” (4-7-14) consists of 10 manthras is called as “Vihavya”, meaning is to be desired/invited/invoked for achieving the desired results.

The fourth Anuvakam starts as “AgnErmanvE” (4-7-15) consists of 22 manthras is called as “MRugara:” used in several stages of Asvamedha yagna.

Except the “Jeemuthasyeva” anuvaakam, the remaining anuvakams(and constituent mantras) are forming part of “UdakaSanthi” manthras compiled by Bodhayana Maharishi.

Chanting of “Svasti VAchanam” thus provides all auspiciousness, prosperity and assured success.

## Acknowledgement:

1. This Compilation has been completely made and provided to VedaVMS for the benefit of all Veda learners by Vedic Group - **Vedha SIRAS** based in **West Mambalam, Chennai.**

2. We would like to sincerely and whole-heartedly thank their team specially their Guru **Shri. Melma L. Venugopalan** and his Gurus – **Shri I.V.K. Chary and Shri Vengalathur Mani Sastrigal**

3. We would also like to mention that recently Veda SIRAS Group has been continuously assisting VedaVMS in proof-reading, improvements and also assured that they would assist us in additional compilations which are not readily available with us or not compiled by us.

# हरिः ओ(4)म् ॥

**TS 4.6.4.1**

आशुः शिशानो वृषभो न युद्ध्मो घनाघनः क्षोभण-श्चर्.षणीनां ।
संक्रन्दनोऽनिमिष एक वीरः शतꣳ सेना अजयथ् साकमिन्द्रः ॥
संक्रन्दनेना निमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना ।
तदिन्द्रेण जयत तथ् सहद्ध्वं ँयुधो नर इषुहस्तेन वृष्णा ॥
स इषुहस्तैः स निषंगिभिर्वशी सꣳस्रष्टा स युध इन्द्रो गणेन ।
सꣳसृष्टजिथ् सोमपा बाहुशर्द्ध्यूर्द्ध्वधन्वा प्रतिहिताभिरस्ता ॥
बृहस्पते परि दीया- [ ] **16**

**TS 4.6.4.2**

रथेन रक्षोहा ऽमित्राꣳ अप बाधमानः ।
प्रभंजन्थ् सेनाः प्रमृणो युधा जयन्नस्माक-मेद्ध्यविता रथानां ॥
गोत्रभिदं गोविदं ँवज्रबाहुं जयन्तमज्म प्रमृणन्त-मोजसा ।
इमꣳ सजाता अनुवीर-यद्ध्वमिन्द्रꣳ सखायोऽनु सꣳ रभद्ध्वं ॥
बलविज्ञायः-स्थविरः प्रवीरः सहस्वान् वाजी सहमान उग्रः ।
अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमातिष्ठ गोवित् ॥
अभि गोत्राणि सहसा गाहमानोऽदायो- [ ] **17**

**TS 4.6.4.3**

वीरः शतमन्युरिन्द्रः ।

दुश्च्यवनः पृतनाषाड युद्ध्यो-स्माक॑ सेना अवतु प्र युथ्सु ॥

इन्द्र आसां-नेता बृहस्पति र्दक्षिणा यज्ञः पुर एतु सोमः।

देवसेनाना-मभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रे॥

इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुता॑ शर्द्ध उग्रं ।

महामनसां भुवनच्यवानां घोषो देवानां जयता मुदस्थात् ॥

अस्माक-मिन्द्रः समृतेषु ध्वजेष्वस्माकं ँया इषवस्ता जयन्तु । **18**

**TS 4.6.4.4**

अस्माकं ँवीरा उत्तरे भवन्त्वस्मानु देवा अवता हवेषु ॥

उद्धर्.षय मघवन्ना-युधान्-न्युथ्सत्वनां मामकानां महा॑सि ।

उद्वृत्रहन् वाजिनां ँवाजिनान्युद्-रथानां जयतामेतु घोषः ॥

उप प्रेत जयता नरःस्थिरा वः सन्तु बाहवः ।

इन्द्रो वः शर्म यच्छ त्वना-धृष्या यथासथ ॥

अवसृष्टा परा पत शरव्ये ब्रह्म स॑शिता ।

गच्छामित्रान् प्र- [ ] **19**

**TS 4.6.4.5**

विशं मैषां कञ्चनोच्छिषः ॥

मर्माणि ते वर्मभिश्छादयामि सोमस्त्वा राजा ऽमृतेनाभि-वस्तां ।

उरोर्वरीयो वरिवस्ते अस्तु जयन्तं त्वामनु मदन्तु देवाः ॥

यत्र बाणाः संपतन्ति कुमारा विशिखा इव ।

इन्द्रो नस्तत्र वृत्रहा विश्वाहा शर्म यच्छतु ॥ **20** *(A4)*

---

**TS 4.6.6.1**

जीमूतस्येव भवति प्रतीकं यँद्वर्मी याति समदामुपस्थे ।

अनाविद्धया तनुवा जय त्वꣳ स त्वा वर्मणो महिमा पिपर्तु ॥

धन्वना गा धन्वनाऽऽजिं जयेम धन्वना तीव्राः समदो जयेम ।

धनुः शत्रोरपकामं कृणोति धन्वना सर्वाः प्रदिशो जयेम ॥

वक्ष्यन्तीवेदा गनीगन्ति कर्णं प्रियꣳ सखायं परिषस्वजाना ।

योषेव शिङ्क्ते वितताऽधि धन्वन् - [ ] **27**

**TS 4.6.6.2**

ज्या इयꣳ समने पारयन्ती ॥

ते आचरन्ती समनेव योषा मातेव पुत्रं बिभृतामुपस्थे ।

अप शत्रून् विद्ध्यताꣳ सँविदाने आर्त्नी इमे विष्फुरन्ती अमित्रान् ॥

बह्वीनां पिता बहुरस्य पुत्रश्चिश्चा कृणोति समनाऽवगत्य ।
इषुधिः सङ्काः पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः ॥
रथे तिष्ठन् नयति वाजिनः पुरो यत्रयत्र कामयते सुषारथिः ।
अभीशूनां महिमानं – [ ] **28**

**TS 4.6.6.3**

पनायत मनः पश्चादनु यच्छन्ति रश्मयः ॥
तीव्रान् घोषान् कृण्वते वृषपाणयोऽश्वा रथेभिः सह वाजयन्तः ।
अवक्रामन्तः प्रपदैरमित्रान् क्षिणन्ति शत्रू॒ँ॒रनपव्ययन्तः ॥
रथवाहन॒ँ॒ हविरस्य नाम यत्राऽऽ*युधं निहितमस्य वर्म ।
तत्रा रथमुप श॒ग्म॒ँ॒ सदेम विश्वाहा वय॒ँ॒ सुमनस्यमानाः ॥
स्वादुष॒ँ॒ सदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवन्तो गभीराः ।
चित्रसेना इषुबला अमृद्ध्राः सतोवीरा उरवो व्रातसाहाः ॥
ब्राह्मणासः – [ ] **29**

**TS 4.6.6.4**

पितरः सोम्यासः शिवे नो द्यावापृथिवी अनेहसा ।
पूषा नः पातु दुरितादृतावृधो रक्षा माकिर्नो अघश॒ँ॒स ईशत ॥
सुपर्णं वस्ते मृगो अस्या दन्तो गोभिः सन्नद्धा पतति प्रसूता ।

यत्रा नरः सं च वि च द्रवन्ति तत्रास्मभ्यमिषवः शर्म यꣳसन् ॥
ऋजीते परि वृङ्ग्धि नोऽश्मा भवतु नस्तनूः ।
सोमो अधि ब्रवीतु नोऽदितिः – [ ] **30**

**TS 4.6.6.5**

शर्म यच्छतु ॥ आ जङ्घन्ति सान्वेषां जघनाꣳ उप जिघ्नते ।
अश्वाजनि प्रचेतसोऽश्वान्थ् समथ्सु चोदय ॥
अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः ।
हस्तघ्नो विश्वा वयुनानि विद्वान् पुमान् पुमाꣳसं परि पातु विश्वतः ॥
वनस्पते वीड्वङ्गो हि भूया अस्मथ् सखा प्रतरणः सुवीरः ।
गोभिः सन्नद्धो असि वीडयस्वाऽऽस्थाता ते जयतु जेत्वानि ॥
दिवः पृथिव्याः पर्यो– [ ] **31**

**TS 4.6.6.6**

–ज उद्–भृतं ँवनस्पतिभ्यः पर्याभृतꣳ सहः ।
अपामोज्मानं परि गोभिरावृतमिन्द्रस्य वज्रꣳ हविषा रथं ँयज ॥
इन्द्रस्य वज्रो मरुतामनीकं मित्रस्य गर्भो वरुणस्य नाभिः ।
सेमां नो हव्यदातिं जुषाणो देव रथ प्रति हव्या गृभाय ॥

उप श्वासय पृथिवीमुत द्यां पुरुत्रा ते मनुतां ँविष्ठितं जगत् ।
स दुन्दुभे सजूरिन्द्रेण देवैर्दूरा– [ ] 32

**TS 4.6.6.7**

द्वीयो अपसेध शत्रून् ॥
आ क्रन्दय बलमोजो न आ धा निष्टनिहि दुरिता बाधमानः ।
अप प्रोथ दुन्दुभे दुच्छुनाᳪ इत इन्द्रस्य मुष्टिरसि वीडयस्व ॥
आऽमूरज प्रत्यावर्तयेमाः केतुमद् दुन्दुभि र्वावदीति ।
समश्वपर्णाश्चरन्ति नो नरोऽस्माकमिन्द्र रथिनो जयन्तु ॥ 33 *(A6)*

---

**TS 4.7.14.1**

ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेन्धाना स्तनुवं पुषेम ।
मह्यं नमन्तां प्रदिशश्चतस्र स्त्वया–ऽद्ध्यक्षेण पृतना जयेम ॥
मम देवा विहवे सन्तु सर्व इन्द्रावन्तो मरुतो विष्णुरग्निः ।
ममान्तरिक्ष मुरु गोपमस्तु मह्यं ँवातः पवतां कामे अस्मिन्न् ॥
मयि देवा द्रविण मायजन्तां मय्या शीरस्तु मयि देवहूतिः ।
दैव्या होतारा वनिषन्त – [ ] 29

**TS 4.7.14.2**

पूर्वे ऽरिष्टाः स्याम तनुवा सुवीराः ॥

मह्यं यँजन्तु मम यानि हव्याऽऽकूतिः सत्या मनसो मे अस्तु ।

एनो मानिगां कतमच्चनाहं विँश्वे देवासो अधिवोच ता मे ॥

देवीः षडुर्वीरुरुणः कृणोत विश्वे देवा स इह वीरयद्ध्वं ।

माहास्महि प्रजया मा तनूभिर्मा रधाम द्विषते सोम राजन्न् ॥

अग्निर्मन्युं प्रतिनुदन् पुरस्ता– [ ] **30**

**TS 4.7.14.3**

ददब्धो गोपाः परिपाहि नस्त्वं ।

प्रत्यञ्चो यन्तु निगुतः पुनस्ते ऽमैषां चित्तं प्रबुधा विनेशत् ॥

धाता धातृणां भुवनस्य यस्पति र्देव७् सवितारमभि मातिषाहं ।

इमं यँज्ञ मश्विनोभा बृहस्पति र्देवाः पान्तु यजमानन् न्यर्त्थात् ॥

उरुव्यचा नो महिषः शर्म य७् सदस्मिन् हवे पुरुहूतः पुरुक्षु ।

स नः प्रजायै हर्यश्व मृडयेन्द्र मा – [ ] **31**

**TS 4.7.14.4**

नो रीरिषो मा परा दाः ॥

ये नः सपत्ना अपते भवन्त्विन्द्रा–ग्निभ्यामव बाधामहे तान् ।

वसवो रुद्रा आदित्या उपरि स्पृशं मोग्रं चेत्तारमधि राजमक्रन् ॥
अर्वाञ्च मिन्द्रममुतो हवामहे यो गोजिद्–धन–जिदश्व–जिद्यः ।
इमन्नो यज्ञं ँविहवे जुषस्वास्य कुर्मो हरिवो मेदिनं त्वा ॥ **32** *(A14)*

---

**TS 4.7.15.1**

अग्नेर्मन्वे प्रथमस्य प्रचेतसो यं पाञ्चजन्यं बहवः समिन्धते ।
विश्वस्यां ँविशि प्रविविशिवाꣳ समीमहे स नो मुञ्चत्वꣳ हसः ॥
यस्येदं प्राणन्निमिषद् यदेजति यस्य जातं जनमानं च केवलं ।
स्तौम्यग्निं नाथितो जोहवीमि स नो मुञ्चत्वꣳ हसः ॥
इन्द्रस्य मन्ये प्रथमस्य प्रचेतसो वृत्रघ्नः स्तोमा उप मामुपागुः ।
यो दाशुषः सुकृतो हवमुप गन्ता – [ ] **33**

**TS 4.7.15.2**

स नो मुञ्चत्वꣳ हसः ॥
यः संग्रामं नयति सँ वशी युधे यः पुष्टानि सꣳसृजति त्रयाणि ।
स्तौमीन्द्रं नाथितो जोहवीमि स नो मुञ्चत्वꣳ हसः ॥
मन्वे वां मित्रा वरुणा तस्य वित्तꣳ सत्यौजसा दृꣳहणा यं नुदेथे ।
या राजानꣳ सरथं ँयाथ उग्रा ता नो मुञ्चतमागसः ॥

यो वा॒ᳪ रथ ऋ॒जुरश्मिः स॒त्यधर्मा॒ **मिथु॒ श्च**रन्त–मु॒पयाति दू॒षयन्न् ।
स्तौमि – [ ] **34**

**TS 4.7.15.3**

मि॒त्रावरुणा नाथि॒तो जोहवीमि॒ तौ नो मुञ्चत॒मागसः ॥
वा॒योः स॒वि॒तु वि॒दथानि मन्मह॒े यावात्म॒न्वद्–बिभृ॒तो यौ च॒ रक्षतः।
यौ विश्वस्य परि॒भू बभू॒वतु॒स्तौ नो मुञ्चत॒मागसः ॥
उप॒ श्रेष्ठान आ॒शिषो दे॒वयो॒द्धर्मे अस्थिरन्न् ।
स्तौमि वा॒युᳪ स॒वितारं नाथि॒तो जोहवीमि॒ तौ नो मुञ्चत॒मागसः॥
र॒थीतमौ रथी॒नामह्व ऊ॒त॒ये शु॒भं गमिष्ठौ सु॒यमेभि॒रश्वैः ।
ययो –[ ] **35**

**TS 4.7.15.4**

–र्वां देवौ दे॒वेष्व–निशि॒त–मोज॒स्तौ नो मुञ्चत॒मागसः ॥
यदयातं ँवँह॒तुᳪ सू॒र्याया–स्त्रिच॒क्रेण स॒ᳪ सदमि॒च्छमानौ ।
स्तौमि दे॒वा व॒श्विनौ नाथि॒तो जोहवीमि॒ तौ नो मुञ्चत॒मागसः ॥
म॒रुतां मन्वे॒ अधिनो ब्रुवन्तु॒ प्रेमां ँवाच॒ं विश्वा मवन्तु॒ विश्वे ।
आ॒शून् हुवे सु॒यमा॒नूत॒ये ते नो मुञ्च॒न्त्वेनसः ॥
ति॒ग्ममायुधं ँवीडि॒तᳪ सहस्वद् दि॒व्यᳪ शर्द्धः – [ ] **36**

**TS 4.7.15.5**

पृ॑तनासु जि॒ष्णु ।

स्तौमि॑ दे॒वान् म॒रुतो॑ नाथि॒तो जो॑हवीमि॒ ते नो॑ मुञ्च॒न्त्वेन॑सः ॥

दे॒वा᳚नां म॒न्वे अधि॑ नो ब्रुवन्तु॒ प्रेमां ँ वाच॒ं विश्वा॑मवन्तु॒ विश्वे᳚ ।

आ॒शून् हु॑वे सु॒यमा॑नू॒तये॒ ते नो॑ मुञ्च॒न्त्वेन॑सः॥

यदि॒दं मा॑ऽभि॒शो॑चति॒ पौ॑रुषेये॒ण दैव्ये॑न ।

स्तौमि॒ विश्वा᳚न् दे॒वान् ना॑थि॒तो जो॑हवीमि॒ ते नो॑ मुञ्च॒न्त्वेन॑सः ॥

अनु॑नो॒ऽद्यानु॑मति॒ रन्वि – [ ] **37**

**TS 4.7.15.6**

द॑नुमते॒ त्वं ँ वै᳚श्वान॒रो न॑ ऊ॒त्या पृ॒ष्टो दि॒वि ॥

ये अप्र॑थेता॒–ममि॑तेभि॒ रोजो॑भि॒ र्ये प्र॑ति॒ष्ठे अभ॑वतां॒ ँ वसू॑नां ।

स्तौमि॒ द्यावा॑ पृथि॒वी ना॑थि॒तो जो॑हवीमि॒ ते नो॑ मुञ्चत॒मꣳ ह॑सः ॥

उर्वी॑ रोदसी॒ वरि॑वः कृणोतं॒ क्षेत्र॑स्य पत्नी॒ अधि॑ नो ब्रूयातं ।

स्तौमि॒ द्यावा॑ पृथि॒वी ना॑थि॒तो जो॑हवीमि॒ ते नो॑ मुञ्चत॒मꣳ ह॑सः ॥

यत् ते॑ व॒यं पु॑रुष॒त्रा य॑वि॒ष्ठा विद्वा॑ꣳसश्चकृ॒मा कच्च॒ ना – [ ] **38**

**TS 4.7.15.7**

ऽऽ*गः ।

कृधी स्वस्मा॑ऽ अदि॑तेरना॑गा व्येना॑ऽसि शिश्रथो॑ विष्व॑गग्ने ॥

यथा॑ ह॒ तद् व॑सवो गौ॒र्यं॑ चित् प॒दिषि॒ता म॑मुञ्चता यजत्राः ।

ए॒वा त्वम॒स्मत् प्र॑मुञ्चा॒ व्य॑ऽह॒ः प्राता॑र्यग्ने प्र॒तरा॒न्न आयु॑ः ॥ **39** *(A15)*

## ह॑रिः ओ(3)म् ॥